# Chapter 5

## bihar board class 10 sanskrit solutions भारतमहिमा

अभ्यासः

**1 . मौखिकः एकपदेन उत्तरं वदत –**
( क ) के गीतकानि गायन्ति ?
( ख ) एषां कः प्रसन्नः ?
(ग)इयं निर्मला मातृभूमिः कीदृशी अस्ति ?
(घ)अस्मदीया भारतीया धरा कीदृशी अस्ति ?
( ङ ) अस्माभिः सदा किं पूजनीयम् ?

**उत्तरम्-**
( क ) देवाः
(ख) हरिः
(ग)वत्सला
(घ)विशाला
(ङ)भारतम्

**2.स्वमातृभूमिविषये द्वे वाक्ये वदत ।**
**उत्तरम्-**
( क ) अस्माकं मातृभूमिः विशाला , निर्मला , वत्सला चास्ति ।
(ख) अत्र सर्वेजना : एकत्वभावं बहन्तः वसन्ति ।

लिखितः
**1 . एकपदेन उत्तरं लिखत –**
( क ) देवा : कानि गायन्ति ?
( ख ) जनैः कीदृशं जन्म लब्धम् ?
( ग ) विशाला धरा का ?
(घ)जगद् गौरवं किं वर्तते ?
(ङ)समेषां जनानां का भवेत् ?

**उत्तरम्-**
( क ) गीतकानि
(ख) मुकुन्दसेवौपायिकम्
( ग ) भारतभूमिः
( घ ) भारतवर्षम्
( ङ ) देशभक्तिः

**2 . पूर्णवाक्येन उत्तरं लिखत –**
( क ) अस्माकं भारतीया धरा कीदृशी अस्ति ?
(ख)भारतीया धरा कैः काभिः च सेविता ?

evidyarthi

( ग ) धर्म – जाति प्रभेदैः विभिन्नाः जनाः किं वहन्तः वसन्ति ?
(घ)के वारंवार भारते जन्म गृह्णन्ति ?
( ङ ) सर्वेषां जनानां देशभक्तिः कीदृशी भवेत् ?
(च)भारतभूमिः कीदृशी अस्ति ?
( छ ) भारताजिरे जन्म लब्धं स्पृहा केषाम् अस्ति ?

**उत्तरम्-**
( क ) अस्माकं भारतीया धरा निर्मला वत्सला च अस्ति ।
( ख ) भारतीया धरा सागरैः पर्वतैः निर्झरैः वहन्तीभिः अपगाभिः च सेविता ।
( ग ) धर्म – जाति प्रभेदैः विभिन्नाः जनाः एकत्वभावं वहन्तः वसन्ति ।
( घ ) देवाः वारंवारं भारते जन्म गृह्णन्ति ।
(ङ) सर्वेषां जनानां देशभक्तिः सदा आवर्जनीया परादर्शरूपा च भवेत् ।
(च)भारतभूमि : निर्मला वत्सलाच अस्ति ।
( छ ) भारताजिरे जन्म लब्धं स्पृहा देवानां अस्ति ।

**3 . मञ्जूषायां लिखितपदानां समुचितप्रयोगं कृत्वा –**
उदाहरणम्- अनुसृत्य पञ्च वाक्यानि रचयत –
रामेण , श्यामेन , लतया , सीतया , हिमांशुना , शिशुना , गीता , ग्रन्थः , कार्यम् , पत्रम् , रामायणम् , चित्रम् , लेखनीयम् , दर्शनीयम् , पठनीयम् , स्मरणीया , पठनीयः , करणीयम् ।
उदाहरणम् – रामेण पत्रं लेखनीयम् ।

उत्तरम्- ( क ) श्यामेन रामायणम् पठनीयम् ।
( ख ) लतया चित्रम् दर्शनीयम् ।
(ग)सीतया गीता स्मरणीया ।
( घ ) हिमांशुना कार्य करणीयम् ।
( ङ ) शिशुना ग्रंथः पठनीयः ।

**4 . उदाहरणम् अनुसृत्य निम्नाङ्कितपदानां कृते विलोमपदानि लिखत-**
उदाहरणम् ” धन्याः ” इतिपदस्य विलोमपदम् – अधन्याः

| प्रश्नाः | | उत्तरम् |
|---|---|---|
| (क)सुरः | – | |
| (ख)पूजनीयम् | – | अपूजनीयम् |
| ( ग ) भारतीया | – | अभारतीया |
| (घ) शोभनम् | – | अशोभनम् |
| (ङ)प्रसन्न. | – | अप्रसन्नः |
| ( च ) प्रसिद्धम् | – | अप्रसिद्धम् |
| ( छ ) शुभा | – | अशुभा |
| (ज) लब्धम् | – | अलब्धम् |
| (झ) गौरवम् | – | अगौरवम् |
| (ञ) रम्यरूपा | – | अरम्यरूपा |


https://www.evidyarthi.in/

**5 . उदाहरणम् अनुसृत्य रेखाङ्कितानां स्थाने विलोमपदानां प्रयोगं कृत्वा वाक्यानि रचयत ।**

उदाहरणम् – ये पुण्य कुर्वन्ति ते धन्याः भवन्ति ।
उत्तरम्
ये पापं कुर्वन्ति ते अधन्याः भवन्ति ।
( क ) ये सज्जनाः सन्ति ते शोभनं कार्य कुर्वन्ति !
(ख)पुरा गङ्गा निर्मला प्रवहति स्म ।
(ग)वाटिका सपुष्पवृक्षैः रम्या प्रतिभाति ।
( घ ) धर्मात्मा अस्मामिः पूजनीयः ।
(ङ)सद्व्यवहारेण मनसि शान्तिः प्रवर्धते ।

**उत्तरम्**–
( क ) ये दुर्जनाः सन्ति ते अशोभनं कार्य कुर्वन्ति । ( ख ) अधुना गङ्गा मलीना प्रवहति स्म ।
( ग ) वाटिका पुष्पविहीनवृक्षैः अरम्या प्रतिभाति ।
(घ) अधर्मात्मा अस्मामिः अपूजनीयः ।
(ङ)दुर्व्यवहारेण मनसि अशान्तिः प्रवर्धते ।

evidyarthi


https://www.evidyarthi.in/